# का शि का

## चतुर्थोऽध्यायः

### प्रथमः पादः

### ङ्याप्प्रातिपदिकात् । (१/१८२)

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामः आपञ्चमाध्यायपरिसमाप्तेः ङ्याप्प्रातिपदिकाद् इत्येवं तद् वेदितव्यम् । स्वादिषु [1]कप्पर्यन्तेषु [2]प्रकृतिरधिक्रियते । ङीब्ङीष्ङीनां सामान्येन ग्रहणं ङी इति, टाब्डाप्चापाम् आप् इति, प्रातिपदिकम् उक्तम् अर्थवत् (१.२.४५/१७८), 'कृत्तद्धितसमासाश्च' (१.२.४६/१७९) इति, तेषां समाहारनिर्देशो ङ्याप्प्रातिपदिकात् इति । यद्यपि च प्रत्ययपरत्वेन पारिशेष्याद् इयमेव प्रकृतिर्लभ्यते, तथापि [3]वृद्धावृद्धावर्णस्वरद्व्यज्[4]लक्षणप्रत्ययविधौ तत्संप्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं कर्तव्यम् (म.भा.२. १९१), इतरथा हि समर्थविशेषणमेतत् स्यात् । अथ ङ्याब्ग्रहणं किम्, [5]न 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' (व्या. प. २५) [6]इत्येव सिद्धम् ? नैतदस्ति । स्वरूपविधिविषये परिभाषेयं प्रातिपदिक[7]स्वरूपग्रहणे सति [8]लिङ्ग-विशिष्टग्रहणं भवति (व्या. प. २५) इति । तथा च 'युवा खलतिपलितवलिनजरतीभिः' (२.१.६७/७४८) इति [9]ज्ञापकमस्यास्तादृशमेव । किं च तदन्तात् तद्धितविधानार्थं ङ्याब्ग्रहणम्, कालितरा, हरिणितरा, [10]खट्वातरा, मालातरा (म.भा.२.१९४) इति । विप्रतिषेधाद्धि तद्धितबलीयस्त्वं स्यात् (म. भा. २. १९४) ॥

### स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप् । (२/१८३)

'ङ्याप्प्रातिपदिकात्' (४. १. १/१८२) इत्यधिकृतम् । ङ्याप्प्रातिपदिकात् स्वादयः[11] प्रत्यया भवन्ति । उकारादयोऽनुबन्धा यथायोग[12]मुच्चारणविशेषणार्थाः । [13]औटः टकारः सुट् इति प्रत्याहारग्रहणार्थः । पकारः सुप् इति प्रत्याहारार्थः । सङ्ख्याकर्मादयश्च स्वादीनामर्थाः शास्त्रान्तरेण विहितास्तेन सह अस्यैकवाक्यता[14] ।

ङ्यन्तात् तावत् — कुमारी । गौरी । शार्ङ्गरवी । ङीब्ङीष्ङीनां क्रमेण [15]उदाहरणम् ।

कुमारी, कुमार्यौ, कुमार्यः । [16]कुमारीम्, कुमार्यौ, कुमारीः । कुमार्या, कुमारीभ्याम्, कुमारीभिः । कुमार्यै, कुमारीभ्याम्, कुमारीभ्यः । कुमार्याः, कुमारीभ्याम्, कुमारीभ्यः । कुमार्याः, कुमार्योः, कुमारीणाम् । कुमार्याम्, कुमार्योः, कुमारीषु । [17]एवं गौरी, शार्ङ्गरवी चोदाहार्ये ।

[18]आपः खल्वपि — खट्वा । बहुराजा । कारीषगन्ध्या । टाब्डाप्चापां क्रमेणो[19]दाहरणम् ।

---

1. कप्प्रत्यय° क. फ. 2. प्रकृतिरियमधिक्रियते फ. ह. 3. वृद्धातस्य विशेषत्वेन क. 4. °लक्षणे इ. 5. अथ ह. 6. इति सिद्धम् क, इत्येवं इ. 7. °स्वरूपस्य ग्रहणे इ. 8. लिङ्गविशिष्टस्यापि फ. ब. 9. विज्ञापकम् इ. 10. खट्वातरा मालातरा नास्ति ब. फ. 11. च इत्यधिकम् ब. 12. उच्चारणार्थः फ. 13. औटः-प्रत्याहारग्रहणार्थः नास्ति अ. ब. ड. इ. ग. 14. भवति इत्यधिकम् इ. ड.फ. 15. उदाहरणानि क.फ. 16. कुमारीम् – कुमारीषु नास्ति फ. 17. एवं सर्वासु विभक्तिषु फ. 18. आबन्तात् ग.फ. 19. उदाहरणानि ग. फ.